103
A 5
A 45
A II 32

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY

BANGALORE

Accn. No. 591

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.


6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.


Class and No. A 13.II 32

1615-36 The Bangalore Press



A-II-32

ಕಾಗದೂಕತೆಯಿಂದ ಉಳಿಸಿ



A-103

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ.....

I 531
597

SASTHRAMUKTHAVALI.

THE वाणी भवन [illegible]

SRISUKTHA BHASHYAM.

EDITED

BY

P. B. ANANTHACHARIAR

Sanskrit Pandit.

PRINTED AT THE

SRI SUDARSANA PRESS

CONJEEVERAM.

1899.

Price 2 Annas.

(*Registered According to Act XXV of 1867.*)
(All rights reserved by the Editors.)

श्रीः ।

शास्त्रमुक्तावली. १.

श्रीसूक्त भाष्यम्.

श्रीकाञ्ची, प्रतिवादिभयंकरं अनन्ताचार्येण

संशोधितम्

श्रीसुदर्शनमुद्राक्षरशालायां-

मुद्रितमभूत् ।

।कांची।

१८९९.

अस्यग्रन्थस्य पुनर्मुद्रणादिविषये शोधनकर्तुरेवाधिकारः ।

इदानीमस्यमूल्यं कलाद्वयरूप्यम् ॥

श्रीः.

श्रियेनमः.

श्रीहयग्रीवायनमः.

श्रीमतेरामानुजायनमः

१

। श्रीसूक्तभाष्यम् ।

प्रथमा-ऋक्.

हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ।

चन्द्रांहिरण्मयींलक्ष्मीजातवेदोममावह ॥ १॥

भा. आद्ययावाहयेद्देवींश्रीसूक्तस्यनृपेश्वरीम् । द्वितीययासनंदद्याद्द्वयेचैव तृतीयया ॥१॥ दद्यात्पाद्यंचतुर्थ्याचपंचम्याचमनीयकम् । षष्ठ्यास्नानंप्रकुर्वीत सप्तम्यावस्त्रमेवच ॥२॥ मुक्तासंवीतमष्टम्याभूषणानिचपार्थिव । गन्धन्नवम्या संदद्याद्दशम्यापुष्पमेवच ॥३॥ एकादश्यातथाधूपंद्वादश्याज्योतिरेवच । पायसं घृतसंयुक्तंखण्डशर्करयायुतम् ॥ ४ ॥ त्रिवेदयेत्रयोदश्याचतुर्दश्याप्रदक्षिणम् । उद्वासयेत्पंचदश्यालक्ष्मीन्तांलोकमातरम् ॥ ५ ॥ स्नानेवस्त्रेचनैवेद्येदद्यादाचमनं नृप । कृत्वाप्रदक्षिणन्देवीप्रागुद्वासनकर्मणः ॥ ६ ॥ अग्रतोग्निंसमाधायसमूह्याज्यस्यसंस्कृतिम् । कृत्वाग्निंपरिषिच्याथजुहुयादाज्यसंप्लुतम् ॥७॥सूक्तस्यप्रत्र्यचं देव्यास्त्वाहान्तंप्रणवादिकम् । समिधोबिल्ववृक्षस्यपालाशाश्वत्थयोपिच ॥ ८ आज्याहुतीस्तथाहुत्वापरिषिच्यतथैवच । अष्टावंशतिकृत्वोथजपेत्सूक्तंश्रिय स्मरन् ॥ ९ ॥ सर्वदाप्रणवन्दद्यादादौसूक्तस्यपार्थिव. ॥ . .

(१) अस्यभाष्यस्यक्वचिदपिनज्ञायते परन्तुद्राविडदेशस्थः काश्चिद्विशिष्टा द्वैतमतानुयायीतिभाष्यशैलीसमालोचनेनज्ञायते । अस्यचैकंभवपुस्तकं मत्समीप "श्रीहयवदनलीलासदन" पुस्तकालयस्थंप्रायशुद्धंचास्ति । यैर्वास्यशोधनमकारीतिज्ञेयम्

तत्रप्रथमंतावच्छ्रियःपतिंसर्वेश्वरंप्रतिश्रीसमागममर्थयते ॥

जातं-स्वतःसिद्धं, वेदोधनंयस्यसजातवेदइतिविष्णोस्संबुद्धिः. "जात वेदसेसुनवामसोम" मितिमंत्रेपरमात्मानिप्रयोगात्. हिरण्यवर्णां-हितर मणीयवर्णां, हितत्वमभीप्सितसर्वार्थसाधकत्वं, रमणीयत्वं तदनुरूपत्वं. सर्व लक्षणसंपन्नामित्यर्थः, हरिणीं-सर्वलक्षणपापहरणशीलां, ताच्छील्येणिनिः, वृद्ध्यभावश्छान्दसः. यद्वा-हरिणी-कृष्णमृगी, तद्वन्मुग्धामित्यर्थः. सुवर्ण रजतस्रजाम्-स्वसौन्दर्यलावण्यानुगुणस्वर्णरजतमयाभरणयुक्ताम्. चन्द्राम् सर्वाह्लादकारिणीम्, "चदि-आह्लादे." इदित्वान्नुम्. औणादिकोरप्रत्ययः. "इंदिरामिन्दुशीतळा" मितिप्रयोगात्. हिरण्मयीं-हिरण्यादिसर्वधनप्रचुरां. लक्ष्मीम्-सर्वैर्लक्षणीयां. दिव्यलक्षणसम्पन्नांवा. मम-आश्रयणोन्मुखस्यमे, आवह-सन्निधापय. १

द्वितीया-ऋक्.

ताम्मआवहजातवेदोलक्ष्मीमनपगामिनीम्।

यस्यांहिरण्यंविन्देयंगामश्वम्पुरुषानहम् ॥ २ ॥

एवमावाहितांलक्ष्मींप्रार्थयानोनियच्छति.

हेजातवेदः-लक्ष्मीपते ? तां-पूर्वोक्तसमस्तगुणांलक्ष्मीम्, अनपगामिनीं-मत्समीपादनपायिनीम्. मे, आवह-यथामत्समीपादन्यत्रकदाचित्कचि दपिगन्तुनेच्छतितथाकुर्वित्यर्थः. यस्यांलक्ष्म्यामागतायां,हिरण्यं-स्वर्णरूप्यादि, गां-गोमहिषादि. अश्वं-गजरथतुरगादि. पुरुषान्-दासाशिष्यादिपरिचारकांश्च अहं, विन्देयं-लभेयं, ताम्मआवह. २

तृतीया-ऋक्.

अश्वपूर्वांरथमध्यां हस्तिनादप्रबोधिनीम्।

श्रियंदेवीमुपह्वये श्रीर्मादेवीजुषताम् ॥ ३ ॥

मयिप्रीत्याअवतरतामित्याह.

अश्वो व्यापकशीलोभगवान्, अश्नोतेरौणादिकक्वनन्तः.सपूर्वः प्रावेशिको यस्यास्तां, "यथासर्वगतोविष्णुस्तथैवेयंद्विजोत्तम" इत्युक्तेः . रथानां - रहण शीलानां - जीवानां, मध्ये - हृदयगुहायां, यातिष्ठति सारथमध्या, यद्वा - रथ इशरिरं, "शरीररथमेवत्वे" तिश्रुतेः, विष्णुशरिरमध्ये - तद्वक्षसिस्थितामित्यर्थः. हास्तिनादप्रबोधिनिं - हस्तिनो गजवृन्दस्य - आर्तनादेसतीश्वरादपिप्रथमप्रबोध शीलां. आर्तसंरक्षणे नाथादापित्वरमाणाभित्यर्थः. यद्वा - यस्यां≥प्रयाण काले सेनाग्रे असंख्येयानि अश्ववृन्दानिगच्छंतितामश्वपूर्वां . यस्यास्सेना मध्ये रथकदम्बकानिगच्छन्ति - तां - रथमध्यां . पद्मवन वासित्वात्पद्मप्रियाणां गजानांनादैःप्रबुध्यमानां. अथवा - "कोणपत्रगजैर्हेमकलशैरमृतोदकैः । सदाभिषिच्यमानान्तांबोध्यमानांचतैर्गजैः " इतिस्वायम्भुवोक्तद्वादशासनपद्म दळस्थगजनादैरहरहःप्रबुध्यमानामित्यर्थः. श्रियं - भगवद्वक्षस्थलास्थितां.देवीं स्वाप्रियंविष्णुंक्रीडयंतीं,उपह्वये-अनेनमंत्रेणस्वामिनंप्रापयामि. साश्रीर्देवी- मा - त देकशरणंमांप्रति . जुषतां - प्रीतास्तु. ३

चतुर्थीऋक्.

कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्प यंतीं । पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ॥४॥

अथतामभिमुखीकरोति.

काम्-सुखरूपां. सोस्मितां-आ ईषत् उत् उद्गतं यत् स्मितं हासः, तेनसहितां-तकारलोपश्छान्दसः. भगवत्संश्लेषजनितमहानन्दनिमग्नतयासर्वदास्मयमानाम्. हिरण्यप्राकाराम् - हिरण्मय प्राकार परिवृतानन्दमयमण्डपरान्तर्वासिनीं आर्द्रां- दयार्द्रहृदयाम्. दिग्गजैरमृतकलशैस्स्नाप्यमानतयाआर्द्रदेहांवा. ज्वलन्तीं

ಹಸ್ತಪ್ರತಿ ಸಂಖ್ಯೆ A-103

लावण्यमयतेजसाभासमानाम् . तृप्तां - भगवत्संश्लेषजनितमहानन्देन तृप्ताम् . तर्पयंतीं - मधुरशीतळविलोकनामृततरंगपरंपरयातापत्रयतप्तप्राणि जातमाह्लादयंतीं. पद्मोस्थिताम् - स्वसौन्दर्यसौकुमार्यानुगुण सुगन्धसुशीतळ सुखस्पर्शपद्मासनासीनाम्. पद्मवर्णां - पद्मसमानवर्णां . ताम् श्रियं, इह - त्व च्छेषभूतेमयि . उपह्वये - तदनुकूलांजलिमुद्रादिभिरभिमुखीकरोमि. ४

पंचमी ऋक् .

चन्द्रांप्रभासांयशसाज्वलन्तीं श्रियंलोकेदेवजुष्टामु

दारां । तांपद्मनेमींशरण(म्रहं)प्रपद्येअलक्ष्मीर्मे

नश्यतांत्वांवृणे ॥ ५ ॥

इत्यमागतांलक्ष्मींप्रपद्यते.

चन्द्रां - आश्रितानामाल्हादकारिणीं. प्रभासां-प्रकृष्टकान्तिं. "भासृदीप्तौ" वित्यस्मात्पचाद्यच् . लोके - सर्वलोकेषु . जात्येकवचनं. यशसा-आश्रित संरक्षणकार्य्या . ज्वलन्तीं - प्रकाशमानाम् . देवैर्ब्रह्मादिभिस्वाभीष्टसिद्धये-जुष्टां - सेवितां , उदारां - देवायात्माभीष्टप्रदां. पद्ममेवनेमिः- नयनसाधनं, यस्यास्तां . नेमिरित्यौणादिकोमिप्रत्ययः . स्वकरस्थकमलेन - आश्रितानाम निष्टमपनीयसर्वमिष्टमुपनीयस्वचरणांभोजंप्रापयंतीमित्यर्थः. ताम् - सर्ववेदेषु प्रसिद्धां श्रियं प्रपद्ये - सर्वानिष्टनिवृत्तयेभजामि. तेन अलक्ष्मीर्मेनश्यताम् - नष्टाभवतु. पुनरिष्टप्राप्तये वृणेचत्वां-त्वच्चरणारविंदमुपायत्वेनाध्यवस्यामीत्यर्थः.५

षष्ठीऋक्

आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथाबिल्वः।

ಪುಟ್ಟಿಯ ಸಂಖ್ಯೆ A-103

तस्यफलानितपसानुदन्तुमायांतरायांश्चबाह्याअलक्ष्मीः ॥

अथैतद्विघ्नमायादिनाशमर्थयते.

हेआदित्यवर्णे-सूर्यतुल्यकांते ? वनानां - सर्ववृक्षाणां पतिर्वनस्पतिः - अथ शब्दोमंगळार्थकः , अथ - मंगळस्वरूपो बिल्ववृक्षः, तपसोधिजातः. तस्य बिल्ववृक्षस्य , फलानि , तपसा - वीक्षणनामकीर्तनस्मृतिरूपेण . मायां - अज्ञानं . अन्तरायान् - त्वद्भजनसेवादिविघ्नभूतान्, बाह्याअलक्ष्मीः - लक्ष्मी संबंधरहिताःअलक्ष्मीः. नुदंतु - निवारयन्तु. ६

सप्तमीऋक्

उपैतुमांदेविसहकीर्तिश्चमणिनासह।

प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ॥७॥

विद्यैश्वर्यादिप्राप्तिनिदानकीर्त्यादिकमर्थयते.

हेदेवि - मां-त्वदाश्रयं, कीर्तिः - विद्यैश्वर्यादिकृताप्रथा, मणिना - रत्नादिभिः, सह - युगपत् , उपैतु - प्राप्नोतु. अहमस्मिन्लोके प्रादुर्भूतोस्मि - त्वत्प्रसादात्प्रबुद्धोस्मि. कीर्तिमृद्धिं - धनादिसमृद्धिंच, मे - मह्यं, ददातु -दिशतु सालक्ष्मीरितिशेषः. ७

अष्टमीऋक्

क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहम् ।

अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ॥ ८

अलक्ष्मीनिवृत्तिमर्थयते.

क्षुत् अन्नेच्छा,पिपासा -पानेच्छा, तदुभयहेतुभूता, कार्येकारणोपचारः.

मलां - मालिन्यकरणीं, ज्येष्टामलक्ष्मीं - अश्रियं, अहंनाशयामि - त्व त्समाश्रयबलेनध्वंसयामि, हेदेवि, अभूतिं - गृहक्षेत्रारामदासीदासादिर्विभूतिः तद्विरोधिनीं, अकारोविरोधार्थकः. असमृद्धिं-धान्यमणिसुवर्णरूप्यादिस्समृद्धि स्तद्विघातिनीं. सर्वां - अलक्ष्मीं, मेगृहान्निर्णुद - निवारय. ८

नवमीऋक्

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरींसर्वभूतानां त्वामिहोपह्वये श्रियम् ॥ ९ ॥

एवमलक्ष्मींस्वगृहात्पराणुद्यपुनर्लक्ष्मीमाह्वयति.

गन्धश्चन्दनपुष्पाद्यामोदः - सद्वारं - आगमनसाधनंयस्यास्सा- गन्धद्वारा, आराधनोपकरणगन्धपुष्पधूपदीपादियुक्तेगृहेकृतसान्निधानामित्यर्थः. दुराधर्षां- गन्धाद्युपकरणशून्यैःप्राप्तुमशक्याम्, नित्यपुष्टां - सर्वदासंतुष्टां. करीषिणीं- करीषशब्देनसमृद्धिर्लक्ष्यते , सर्वसमृद्धियुक्तामित्यर्थः. ईश्वरींसर्वभूतानां - सर्व भूतानां - समस्तजन्तूनां , ब्रह्मादिस्तंबपर्यंतानां, ईश्वरीं - नियन्त्रीं, तां - पूर्वोक्तांश्रियं, इह - पूर्वोक्तेत्यक्तालक्ष्मीकेगृहे, उपह्वये - सर्वसमृद्ध्यर्थ मावाहयामि. ९

दशमीऋक्

मनसःकाममाकूतिंवाचस्सत्यमशीमहि ।

पशूनांरूपमन्नस्यमयिश्रीश्श्रयतांयशः ॥ १० ॥

अथलक्ष्म्यागमनोत्तरकालभाविनःकामादीनर्थयते.

मनसःकामं-मनसाकाम्यमानंअभीष्टंपुत्रादिकं, आकूतिं - अभिप्रायगतं, मनोरथपरिकल्पितमर्थं. वाचस्सत्यम् - वाचायाच्यमानमभिलषितं. पशूनां-

धेनूनां, रूपं - स्वरूपं, अन्नस्य - अदनीयद्रव्यस्य - सबंधि - यशः - प्रथां, पूर्तिमितियावत्. अशीमहि - "अश्नुव्याप्ता" वित्यस्माल्लिङुत्तमबहुवचनं. मम - मत्संबंधिनांचएतदस्तीतिज्ञापनार्थंबहुवचनं. एतदर्थं श्रीर्मयिश्रयतां. १०

एकादशीऋक्

कर्दमेनप्रजाभूतामयिसंभवकर्दम ।

श्रियंवासयमेकुलेमातरंपद्ममालिनीं ।

"क्षीरोदार्णवसंभूतांश्रियंजग्राहकर्दमः।प्रजात्वेनतदाविप्रस्तदाप्रभृतिकर्दमः॥ पिता" इतिवचनात् श्रीपितृभूतंकर्दमंप्रतिबोध्यतन्मुखेनापिश्रीसान्निध्यमर्थयते.

हेकर्दम, कर्दमेन - कर्दमनाम्नात्वया, प्रजाभूता -प्रजात्वेनप्राप्ता, अभूत तद्भावोच्चिः. ईत्वाभावश्छांदसः. अतस्तांश्रियं मयिसंभव, संभावय - समुद्भावयेत्यर्थः. किंच - मातरं - मातृत्वप्रयुक्तवात्सल्यवतीं. पद्ममालिनीं- पद्मरचितमालावतीं, श्रियं - त्वत्पुत्रीं, मे-कुले-संताने,पुत्रपौत्रादिषु, गृहे - वासय. ११

द्वादशीऋक्

आपस्सृजन्तुस्निग्धानिचिक्लीतवसमेगृहे ॥

निचदेवींमातरंश्रियंवासयमेकुले ॥

अथश्रियोदौवारिकमर्थयते.

चिक्लीतोनामभगवदन्त्यपुरद्वारपालः।तथाच-पौराणिकाः॥ "पद्मोभोगनिधिश्शंख श्चतुर्दंतोगजस्तथा, कळ्याणसर्वपंचास्य श्चिक्लीतोगृहरक्षकाः" इति हेचिक्लीत,आपः - भगवदायतनभूताः, स्निग्धानि - आज्यदधिप्रभृतीनि , सृजन्तु- उत्पादयन्तु, त्वत्प्रेरिताआपः मेगास्संपादयन्त्वित्यर्थः. मम - गृहे,

श्रीमतिभगवद्भवनद्वारइव, वस-तिष्ठ, स्थित्वाचदेवीं - द्योतनशीलां, मातरं - अस्माकंजननीं, सर्वसमाश्रयणीयां, मे - कुले - गृहे, निवासय - निश्चलं प्रतिष्ठापय, पुनर्निर्गमनमस्याःप्रतिषेधयेत्यर्थः. "व्यवहिताश्चे",त्युपसर्गस्यव्यवधानंछन्दसं. १२

त्रयोदशीऋक्

आर्द्रांपुष्करिणींयष्टिंपिंगळांपद्ममालिनीम् ।
मे

चन्द्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ १३ ॥

अथलक्ष्मीपतिमर्थयते.

आर्द्रां - दयार्द्रां. पुष्करिणीं - पद्मसमानाकारां. यद्वा, पद्मवर्तिनीं मित्यर्थः. यष्टिम्-यजनक्रियास्वरूपां, सकलयज्ञनिर्वाहिकामित्यर्थः, संप्रसारणाभावआर्षः, यष्टिम् - यष्टिवत्तान्वींवा, पिंगळां - पिंगळवर्णामित्यर्थः. पद्ममालिनीं - दिव्यविग्रहोचितपद्ममालालंकृतां. चन्द्रां - आह्लादकारिणीं. हिरण्मयींलक्ष्मीं, जातवेदोममावह - भगवन्मह्यमावह - आनाहय - मांप्रापयेत्यर्थः. १३

चतुर्दशीऋक्

आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीम् ।

सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ १४ ॥

अतिशयात्पूर्वोक्तंपुनराह ॥

आर्द्रांपुष्करिणीमितिगतार्थं. पुष्टि-पुष्टिस्वरूपां,सुवर्णां समीचीननवर्णां,सूर्यां-

श्रीयैनमः ॥

॥ श्रीमतेरामानुजायनमः ॥

श्रीसूक्तंतावत्पंचदशर्चम् ॥

यद्यपि "पद्मप्रियेपद्मिनिपद्महस्ते" इत्यादयःकेचिन्मत्राश्श्रीसूक्तपठनोत्तर मेवकैश्चित्पठ्यन्ते। तथापि नतेश्रीसूक्तान्तर्गताः। "श्रियंःपंचदशर्चंतु" इत्यादिभिः पंचदशर्चत्वस्यैवावगमात् ।

अस्यश्रीश्रीसूक्तमहामन्त्रस्य श्रीःऋषिः । श्रीश्छंदः । विष्णुपत्नीदेवता लक्ष्मीनारायणार्चनेविनियोगः । अर्चनप्रकारस्तुभाष्यएवश्लोकरूपेणप्रदर्शितो स्ति। अन्यादृशाश्चप्रकारा लक्ष्मीतन्त्रादिभिर्ज्ञेयाः ॥

एतत्सूक्तवटकीभूतानामृचांप्रत्येक मेकैकफलप्रदत्वमस्ति। तत्राद्यायाः-हिरण्यतेजोभोगचंद्रसायुज्यप्रदत्वम्। द्वितीयर्चोहिरण्यगोदासीदासप्रदत्वं। तृतीयायाः. राज्यशत्रुविजयप्रदत्वम्। चतुर्थ्यास्संपद्विद्याप्रदत्वं। पञ्चम्याः निधिमूलधनराजसन्मानशत्रुविजयप्रदत्वं। षष्ठ्याःस्थिरधनप्रदत्वं। सप्तम्याः कुबेरादिदर्शनचिन्तामण्यादिरत्ननवनिधिप्राप्तिकरत्वं। अष्टम्याः दौर्भाग्यनाशकत्वं। नवम्याः-कृषिमूलफलप्रदत्वधनधान्यपशुसमृद्धिकरत्व महत्त्वापादकत्वादिकम् । दशम्याः-वाक्सिद्धिभोगप्रदत्वं। एकादश्याःसन्तानप्रदत्वम्। द्वादश्याः-स्वेच्छासमकालमेवहितमृष्टान्नप्रदत्वं महालक्ष्मीस्थैर्यप्रदत्वञ्च। त्रयोदश्याःगजान्तैश्वर्यप्रदत्वं। चतुर्दश्यास्सार्वभौमत्ववशीकरणसिद्धिप्रदत्वं। पञ्चदश्याविद्याधनप्रदत्वञ्चेति ॥

तत्तज्जपादिप्रकारास्तु मन्त्रकल्पार्णवादिभ्योज्ञेयाः ॥

अस्मिंश्चश्रीसूक्तेत्रिपञ्चाशत्संख्याकालक्ष्मीमन्त्रा अन्तर्गतास्सन्ति। तेयथा—

मन्त्राः	अक्षरसंख्या.	मन्त्राः	अक्षरसंख्या.
१ ओं हिरण्यवर्णायैनमः.	९.	६ ओं हिरण्मय्यैनमः.	७.
२ ,, हरिण्यैनमः.	६.	७ ,, लक्ष्म्यैनमः.	५.
३ ,, सुवर्णस्रजेनमः.	८.	८ ,, अनपगामिन्यैनमः.	९.
४ ,, रजतस्रजेनमः.	८.	९ ,, अश्वपूर्वायैनमः	८.
५ ,, चंद्रायैनमः.	६.	१० ,, रथमध्यायैनमः	८.

११	ओं हस्तिनादप्रबोधिन्यैनमः	११.	
१२	,, श्रियैनमः	५.	
१३	,, देव्यैनमः	५.	
१४	,, मायैनमः	५.	
१५	,, कायैनमः	५.	
१६	,, सोस्मितायैनमः	७.	
१७	,, हिरण्यप्राकारायैनमः	१०.	
१८	,, आर्द्रायैनमः	६.	
१९	,, ज्वलन्त्यैनमः	६.	
२०	,, तृप्तायैनमः	६.	
२१	,, तर्पयंत्यैनमः	७.	
२२	,, पद्मेस्थितायैनमः	८.	
२३	,, पद्मवर्णायैनमः	८.	
२४	,, चन्द्रायैनमः	६.	
२५	,, प्रभासायैनमः	७.	
२६	,, यशसायैनमः	७.	
२७	,, ज्वलंत्यैनमः	६.	
२८	,, देवजुष्टायैनमः	८.	
२९	,, उदारायैनमः	७.	
३०	,, तायैनमः	५.	
३१	,, पद्मनेम्यैनमः	७.	
३२	,, आदित्यवर्णायैनमः	९.	
३३	ओं कीर्त्यैनमः	५.	
३४	,, ऋद्ध्यैनमः	५.	
३५	,, गन्धद्वारायैनमः	८.	
३६	,, दुराधर्षायैनमः	८.	
३७	,, नित्यपुष्टायैनमः	८.	
३८	,, करीषिण्यैनमः	७.	
३९	,, ईश्वर्यैनमः	६.	
४०	,, मनसःकामायैनमः	९.	
४१	,, वाचामाकूत्यैनमः	८.	
४२	,, सत्यायैनमः	६.	
४३	,, पशूनांरूपायैनमः	९.	
४४	,, अन्नस्ययशसेनमः	९.	
४५	,, मात्रेनमः	५.	
४६	,, पद्ममालिन्यैनमः	८.	
४७	,, पुष्करण्यैनमः	७.	
४८	,, यष्ट्येनमः	६.	
४९	,, पिंगळायैनमः	७.	
५०	,, तुष्ट्येनमः	६.	
५१	,, सुवर्णायैनमः	७.	
५२	,, हेममालिन्यैनमः	८.	
५३	,, सूर्यायैनमः	६.	

इति

यद्यप्यत्रकेपुचिन्मन्त्रेषु भाष्यपाठापेक्षया भेदोदृश्यते. तथापिपाठभेदकल्पनेन समाधिस्सुकरैव। एतेषांमन्त्राणामुपासनादिक्रमाः फलभेदाश्चलक्ष्मीतन्त्राज्ज्ञेयाः॥विस्तरभयान्नलिख्यन्ते॥ — इतिविज्ञापयिता,

प्र. गा. अनन्ताचार्यः.

सूर्यां - सुष्ठुसर्वंजगदीरयन्तीं . राजसूयेत्यादिनानिपातितोयं . अन्यत्सर्वंगतार्थं ॥

॥ १४ ॥

पंचदशीऋक्

तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ।

यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विन्देयंपुरुषानहम् ॥

हेजातवेदः - भगवन् । यस्यां लक्ष्म्यां आगतायां । प्रभूतम् - पुष्कळम् । हिरण्यम् - धनम् । गावः - गोमहिषादीन् । दास्यः - दासीजनान् । पुरुषान्-पुत्रपौत्रमित्रादीन् । विन्देयं - लभेयं । अनपगामिनीं - निवृत्तिरहितां । तादृशींलक्ष्मीं । मे - मदर्थं । आवह ॥ .... ॥१५॥

एवमर्थानुसन्धानपुरस्सरं श्रीदेव्याः पञ्चदशर्चस्यसूक्तस्य जपं होमं तर्पणंब्राह्मणाराधनंच कुर्वन्पुमान् इहसकलसौभाग्यनिधानम् परत्रपरमसुखभाजनञ्चभवतीतिसर्वत्रसर्वमङ्गळम् ॥

व्याख्यामेतान्तुयोभक्त्या वदेद्वाशृणुयाद्बुधः । नारायणवधूस्साक्षादिष्टंतस्मैप्रयच्छति ॥ १ ॥ स्नायात्पिबेज्जपेदर्चेदश्नीयादभिमंत्रितं । एवंतरतिदारिद्र्यं हुनेदाज्यैः पुमान्ध्रुवम् ॥ २ ॥

श्रीसूक्तभाष्यम्-सम्पूर्णम्

ಪುಟ್ಟಿವಿಲೆ ಸಂಖ್ಯೆ A-103

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

This book was loaned on the last date mentioned below and it is returnable within a fortnight therefrom unless the loan is renewed.

1641-35 B P.